# संस्कृतवार्ताः

दिनाङ्क :- 24.05.2025

प्रातः - 06:55

विदेशमन्त्रालयः-सुरक्षासमितिः

पहलगामातङ्कीयाक्रमणस्य अनन्तरं भारतेन नैके कठोराः पदक्षेपाः समुत्थापिताः येषु सिन्धु जल-सन्धेः षष्ट्यधिक-नवदशशत-तमवर्षस्य निलम्बनम् एकीकृतस्य उपरक्षणक्षेत्रस्य अट्टारी इत्येतस्य पिधानम् च सम्मिलितौ स्तः। सुरक्षा-विषयक-मन्त्रिमण्डल-समित्या सी.एस.एस. इत्यनया ह्यः सायंकाले प्रधानमन्त्रिणः नरेन्द्रमोदिनः निजावासे स्वकीयोपवेशने समग्र-सुरक्षा-स्थितिः समीक्षिता अथ च सर्वाणि बलानि उच्चसर्तकतां स्थापयितुम् आदिष्टानि। ह्यः रात्रौ नवदिल्ल्यां वार्ताहरान् संसूचयन् विदेशसचिवः विक्रममिस्री इत्येषः प्रत्यपादयत् यत् पाकिस्तान-नागरिकेभ्यः सार्क-पारगमनानुमतिपत्र-मुक्त-योजनायाः अन्तर्गतं भारतस्य यात्रार्थम् अनुमतिः नैव दास्यते। असौ अग्रे अवोचत् यत् पाकिस्तान-नागरिकेभ्यः यत् भूतकाले किमपि एस.वी.ई.एस. इतीदं पारगमनानुमतिपत्रम् निर्गतमासीत् तत् निरस्तमिति मन्यते। असौ पुनः उक्तवान् यत् अस्य पत्रस्य अन्तर्गतं भारते निवसन्तः पाकिस्तानदेशीयाः नागरिकाः अष्टचत्वारिंशत्होराभ्यान्तरैव भारतं त्यजेयुःइति। अत्रावधौ विदेशसचिवः सूचितवान् यत् नवदिल्ली-स्थिते पाकिस्तानोच्चायोगे रक्षा सैन्यबलं नौसेना वायु-परामर्शकाः पर्सोना-नॉन-ग्रैटा-इति उद्घोषिताः। भारतमपि स्वरक्षापरार्मशकान् इस्लामाबादस्थितात् भारतीयोच्चायोगात् प्रत्यावर्तयिष्यति। श्रीमिस्री प्रोदीरितवान् यत् सम्बन्धेषु उच्चायोगेषु एतानि पदानि रिक्तानि एव आमान्यते।

पहलगामः-सर्वदलीयोपवेशनम्

प्रशासनेन पहलगामे जातस्य आततङ्क्याक्रमणस्य अनन्तरम् अद्य नवदिल्ल्यां सर्वदलीयोपवेशनम् समाहूतम्। सूत्रानुसारि इदमुपवेशनम् अद्य सायंकाले षड्वादने संसत्भवनपरिसरे समनुष्ठास्यते।

संयुक्तराष्ट्रम्

संयुक्त-राष्ट्र-महासचिवः अन्तोनियो-गुटरेस इत्ययं जम्मू-कश्मीर-राज्ये दुरापादितम् आतङ्क्याक्रमणम् निन्दितवान्। असौ सबलतया प्रख्यापितवान् यत् नागरिकाणां विरूध्य आक्रमणम् कस्यामपि परिस्थित्याम्

अस्वीकरणीसमिति वर्तते। महासचिवस्य प्रवक्ता स्टीफन-दुजारिक-इत्येषः अकथयत् यत् श्रीगुटेरेस-इत्येषः शोकसंतप्तेभ्यः मृतकानां परिवार जनेभ्यः शोकसंवदेनां प्रकटितवान्।

प्रधानमन्त्री

राष्ट्रीय-पञ्चायती-राज-दिवसावसरे प्रधानमन्त्री नरेन्द्रमोदी अद्य बिहार-राज्यस्य मधुबनी-क्षेत्रात् समग्र देशस्य पञ्चायतीराजसंस्थाः ग्रामसभाः च सम्बोधयिष्यति। अत्रावधौ प्रधानमन्त्री अशीत्यधिक- चतुश्शतोत्तर-त्रयोदशसहस्र-कोटि रूप्यकाणां विभिन्नाः विकासात्मकपरियोजनाः राष्ट्राय समर्पयिष्यति अथ च शिलान्यासं उद्घाटनं च विधास्यति एतासां परियोजनानाम्। एतासु परियोजनासु रेल-विद्युत्सम्पर्क -सौविध्यं च सम्मिलिते स्तः। अस्माकं वार्ताहरः सूचितवान् यत् यात्राप्रवासावधौ प्रधानमन्त्री जयनगर-पटना-नगरयोः मध्ये प्रचाल्यमानस्य नमो-भारत-रैपिड-रेल-यानाय हरितध्वजमपि प्रदर्शयिष्यति। आकाशवाण्या सह सञ्जाते सम्वादक्रमे रेलमन्त्रालयस्य कार्यकारि-निदेशकः दिलीप-कुमारः उक्तवान् यत् पूर्णरूपेण वातानुकूलितं एतद्धि नमोभारत रेलयानं यात्रिसम्बद्धाभिः सुविधाभिः सुसज्जितम् अथ च उन्नतसुरक्षा प्रणालीयुतं चास्ति इति।

जम्मू-कश्मीर-पर्यटकः

जम्मू-कश्मीर-प्रदेशे पहलगामाक्रमणस्य अनन्तरं पर्यटन-मन्त्रालयः सर्वैः पर्यटन-सेवा-प्रदातृभिः पर्यटकान् सर्वाणि सम्भवसाहाय्यानि प्रदातुं प्रार्थयत्। सर्वेभ्यः यात्रा-अभिकर्तृभ्यः, पर्यटन-निर्वाहकेभ्यः, अन्तर्जाल- गत-यात्रा-समुच्चयेभ्यः, पर्यटन-परिवहन-प्रदातृभ्यः, इत्यादिभ्यश्च निरसनशुल्कं परिहर्तुमपि मन्त्रालयः आदिष्टवान्।

आई.पी.एल.

आई.पी.एल. इत्येतस्यां विंशति प्रति विंशति-क्रिकेट-मालिकायाम ह्यः रात्रौ क्रीडिते द्वन्द्वे हैदराबादनगरे मुम्बईइण्डियन्स-दलेन सनराइजर्स-हैदराबाद-दलं सप्तस्तोभैः पराजितम्। तत्रैव अद्य रॉयल-चैलेन्जर्स बेङ्गलुरू-दलस्य सामुख्यं एम्. चिन्नास्वामि-क्रीडाङ्गणे राजस्थान-रॉयल-दलेन साकं भविष्यति। एतत् द्वन्द्वं सायंकाल सार्ध-सप्तवादनतः क्रीडिष्यते।